# श्री शिवपंचाक्षर स्तोत्रम्

नागेंद्रहाराय त्रिलोचनायभ स्मांगरागाय महेश्वराय।

नित्याय शुद्धाय दिगंबरायत स्मै "न" काराय नमः शिवाय ॥ 1 ॥

मंदाकिनी सलिल चंदन चर्चितायनं दीश्वर प्रमथनाथ महेश्वराय।

मंदार मुख्य बहुपुष्प सुपूजितायत स्मै "म" काराय नमः शिवाय ॥ 2 ॥

शिवाय गौरी वदनाब्ज बृंदसू र्याय दक्षाध्वर नाशकाय।

श्री नीलकंठाय वृषभध्वजायत स्मै "शि" काराय नमः शिवाय ॥ 3 ॥

वशिष्ठ कुंभोद्भव गौतमार्यमु नींद्र देवार्चित शेखराय।

चंद्रार्क वैश्वानर लोचनायत स्मै "व" काराय नमः शिवाय ॥ 4 ॥

यज्ञ स्वरूपाय जटाधरायपि नाक हस्ताय सनातनाय।

दिव्याय देवाय दिगंबरायत स्मै "य" काराय नमः शिवाय ॥ 5 ॥

पंचाक्षरमिदं पुण्यं यः पठेच्छिव सन्निधौ।

शिवलोकमवाप्नोति शिवेन सह मोदते ॥ 6 ॥

॥ श्री शिवपंचाक्षर स्तोत्रम् संपूर्णम ॥